# Sarvasamarpanagadyam

# સર્વસમર્પણગદ્યમ્

## Document Information

Text title : Sarvasamarpanagadyam Surrendering everything to the Almighty

File name : sarvasamarpaNagadyam.itx

Category : deities_misc, advice, rAghavendra, gadyam

Location : doc_deities_misc

Author : Raghavendra Swami

Proofread by : Aruna Narayanan

Description/comments : Goes together with Pratah Sankalpa Gadyam

Latest update : August 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

# સર્વસમર્પણગદ્યમ્

ૐ જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્ય-અવસ્થાત્રયનિયામક, મદન્તર્યામિ મુખ્યપ્રાણાન્તર્ગત વિશ્વ-તૈજસ-પ્રાજ્ઞાત્મક, હિઙ્કારાદિષટ્સામપ્રતિપાદ્ય ષટ્કાલનિયામક, અનિરુદ્ધ-પ્રદ્યુમ્ન-સઙ્કર્ષણ-વાસુદેવ-વરાહ-નારસિંહ-ષણ્મૂર્ત્યાત્મક, સ્વહૃદયમધ્યસ્થિત-સુષુમ્નાનાડીદક્ષિણપાર્શ્વસ્થિત-પઞ્ચાશત્સઙ્ખ્યાક-પિઙ્ગળાનાડીષુ તદુત્તરપાર્શ્વસ્થિત-તાવત્સઙ્ખ્યાક-વ્યઞ્જનવર્ણપ્રતિપાદ્ય-તાવત્સઙ્ખ્યાકેડાનાડીષુ તત્તદ્યોગ્ય-તત્તત્કાલાનુસારપ્રાપ્ત-તત્તન્નાડીસ્થિત-બૃહતીછન્દ-ઋક્સહસ્રગત-ષટ્ત્રિંશત્સહસ્ર-સ્વરાખ્યાક્ષરપ્રતિપાદ્ય તન્નિષ્ઠ- તન્નિયામક-પ્રાતર્માધ્યન્દિનસાયમાખ્ય-સવનત્રય-તત્તત્કાલીન-તદભિમાનિ-વસુરુદ્રાદિત્યોપાસ્ય-પરમાણુસમ્બન્ધિ-તાવત્સઙ્ખ્યાક-અહર્નિયામક-અહર્નામક મુખ્યપ્રાણોપાસ્ય-રમાયુક્ત-પુરુષરૂપાત્મક પ્રાદેશમાત્રહૃદયવ્યાપક-પ્રાદેશપરિમિતસ્થાનેશાત્મક દેહાન્તર્ગત-દેહાઙ્ગુષ્ઠપરિમિત-જીવાન્તર્ગત જીવાઙ્ગુષ્ઠપરિમિત સ્વહૃદયકમલકર્ણિકામૂલસ્થિત-મૂલેશાત્મક તાવત્પરિમિતકર્ણિકાગ્રસ્થિત-બિમ્બરૂપે જીવેશત્વદૃષ્ટ્યાઽનાદિકાલતઃ પ્રાપ્તમદીયશુભાશુભકર્મણોર્મધ્યે શુભકર્માનુસારતસ્તત્પ્રેરિતેન મુખ્યપ્રાણેન, તત્ત્વાભિમાનિદેવતાદ્વારાઽનુકારિત-અવસ્થાત્રયનિયામક-અનુભવકાલઘટિત-શ્રીવિષ્ણુસ્વાતન્ત્ર્ય-સ્મૃતિપ્રદાનક નિત્ય-નૈમિત્તિક-કામ્યભેદેન ત્રિવિધવિદ્યાશ્રિત-સ્વવર્ણાશ્રમોચિતસઙ્કુલ્પિત-ભગવત્પૂજાત્મક કર્મફલજન્યફલેન-અપરોક્ષજ્ઞાનાત્ પૂર્વમન્તઃકરણશુદ્ધિદ્વારા તદુપાસકેન તતઃ પરં ભગવદિચ્છયા પ્રાપ્ત નિજગુરૂપદિષ્ટ-સ્વબિમ્બવિષયક-પૂર્ણસચ્ચિદાનન્દાત્મક ચતુર્ગુણાદ્યુપાસન-જિજ્ઞાસાદ્યુપાસાદિભિઃ સ્વબિમ્બાપરોક્ષજ્ઞાનોત્પાદકેન મનુષ્યોત્તમાનામારભ્ય ચતુર્મુખપર્યન્તાનાં પઞ્ચવિધમુક્તિયોગ્યાનાં ચ સ્વબિમ્બોપાસિભિઃ લિઙ્ગાપગમે સ્વરૂપાનન્દાવિર્ભાવ-વૈચિત્ર્યાનન્દપ્રદજ્ઞાનેન ત્વયિ સમર્પિતેન ત્વત્પૂજૈવાસ્તુ ।

તથા મદીયશુભાશુભ-કર્મણોર્મધ્યે-અશુભકર્માનુસારેણ ત્વત્પ્રેરિતમુખ્યપ્રાણેન તત્ત્વાભિમાનિ-અસુરમારભ્ય કલિપર્યન્તાનાં તમોયોગ્યાનાં પાપબાધિભિર્ગદાયુધપ્રદાનેન મહાતમસિ-સ્થિતાનાં દુઃખાનુભવેન સ્વરૂપભૂતદુઃખાતિશયપ્રદાતેતિ જ્ઞાનેન ત્વયિ સમર્પિતેન ત્વત્પૂજૈવાસ્તુ ॥

ઇતિ શ્રીરાઘવેન્દ્રાખ્યયતિના વિરચિતં સર્વસમર્પણગદ્યં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Sarvasamarpanagadyam*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*